**Model Question Paper**

**First Term Evaluation 2025 -26**

**First Language - Paper I - Part I**

**SANSKRIT**

**(For Academic and Oriental Sanskrit Schools)**

**Class- IX**

**Time 1 ½ Hours** **Total Score - 40**

निर्देशा: -

- 15 निमेषा: समाश्वासकाल: ।
- प्रश्नान् निर्देशान् च सम्यग् अवगम्य एव उत्तराणि लेखनीयानि ।
- उत्तरलेखने मूल्याङ्का: काल: च परिगणनीया:।
- विवर्तनप्रश्नाद् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिरुपयोक्तव्या ।

© State Assessment Cell – SCERT Kerala

**भागः - 1**

**कविताभागं पठित्वा प्रश्नस्य उत्तरं लिखत।**

वहन्ति नद्यस्तिष्ठन्त्यस्मिन्
महाचलाः बहवः।
अरण्यकेदारोपवनानि
सुखप्रदानि तथा ।।

1.अस्मिन् विश्वे के तिष्ठन्ति? (1)

क) नद्यः ख) महाचलाः ग) अरण्यकेदाराः घ) उपवनानि

2. **तदधिकृत्य** इत्यस्य पदच्छेदं चित्वा लिखत। (1)

क) त + दधिकृत्य

ख) तत् + अधिकृत्य

ग) तदधि + कृत्य

घ) तदधिकृत् + ल्य

3. प्रस्तावनां पठित्वा प्रश्नस्य उत्तरं लिखत। (1)

१) व्यायामं कुर्वतः भोजनं निर्दोषं पच्यते।

२) रोगाः भेषजैः विनापि पथ्यात् विनश्यन्ति।

क) उभयमपि (१, २) साधु।

ख) उभयमपि (१, २) असाधु।

ग) १-साधु, २-असाधु।

घ) १-असाधु, २-साधु।

4. अधोदत्तपट्टिकां पठित्वा विकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत। (1)

| | |
|---|---|
| अचलः | - स्वर्गः |
| तरुः | - पर्वतः |
| नाकः | - द्रुमः |

क) अचलः-द्रुमः, तरुः – पर्वतः, नाकः - स्वर्गः

ख) अचलः- पर्वतः, तरुः - द्रुमः, नाकः - स्वर्गः

ग) अचलः - स्वर्गः, तरुः – पर्वतः, नाकः - द्रुमः

घ) अचलः - द्रुमः, तरुः – स्वर्गः, नाकः - पर्वतः

## भागः - 1

**कवितां पठित्वा 5-6 प्रश्नयोःउत्तरे लिखत ।**

विशालसुन्दरविश्वं पश्यतु
नयनानन्दकरम्।
सर्वचराचरनिवासमतुलं
मदीयनाकमिम्।।

5. कविः प्रकृतिं कथं वर्णयति इति स्ववाक्यैः लिखतु? (2)

6. अतुल्यम्, नेत्रम् - इत्येतयोः अर्थे प्रयुक्तं पदद्वयं चित्वा लिखत । (2)

**गद्यभागं पठित्वा 7 -8 प्रश्नयोः उत्तरे लिखत।**

सस्यानि अधिकृत्य भरद्वाजः विशदयति - वृक्षाः रोगपीडिताः भवन्ति। चिकित्सया तेषां रोगविमुक्तिरपि भवति। छिद्यन्ते चेत् तस्मात् स्रवाः क्षरन्ति। लताः वृक्षान् उपगम्य परिवेष्टन्ते।

7. भरद्वाजस्य विशदीकरणस्य आशयं स्पष्टयत। (2)

8. गद्यभागात् ल्यबन्तपदद्वयं विविच्य लिखत । (2)

9. उदाहरणानुसारं वाक्यं परिवर्तयत । (2)

उदा – श्रेयसः रसतन्त्रं **पठति**।

श्रेयसः रसतन्त्रम् **अपठत्**।

वार्तासंघः वार्ताहरणाय सचिवमन्दिरं गच्छति।

© State Assessment Cell – SCERT Kerala

.......................................................।

**अथवा**

वाक्यं शोधयत।

उदा – विद्यालयस्य परितः पुष्पाणि सन्ति।

**विद्यालयं** परितः पुष्पाणि सन्ति।

पर्वतस्य परितः राजमार्गाः सन्ति।

...............................................।

10. तुमुन्नन्तपदान्युपयुज्य वाक्यं योजयत। (2)

उदा – बालाः क्रीडाङ्कणं गच्छन्ति। ते क्रीडिष्यन्ति।

बालाः क्रीडितुं क्रीडाङ्कणं गच्छन्ति।

छात्राः ग्रन्थालयं गच्छन्ति। ते ग्रन्थान् पठिष्यन्ति।

..............................................................।

11. उचितेन विशेषणपदेन रिक्तांशौ पूरयत। (विरचिते, महाकविना) (2)

................ कालिदासेन ................. रघुवंशमहाकाव्ये 19 सर्गाः सन्ति।

12. विग्रहवाक्यं समस्तपदेन सह योजयित्वा पट्टिकां पूरयत। (3)

| |
|---|
| न अशनम् अनशनम् तेन। |
| रसं ददाति इति ताम्। |
| कृशानि अङ्गानि यस्याः सा। |

| | |
|---|---|
| कृशाङ्गी | ...................................................। |
| रसदाम् | ...................................................। |
| अनशनेन | ...................................................। |

13. आशयमवगम्य गद्यक्रमं पूरयत। (3)

समदोषः समाग्निश्च
समधातुमलक्रियः।
प्रसन्नात्मेन्द्रियमनाः
स्वस्थ इत्यभिधीयते॥

गद्यक्रमः - समदोषः ................................. समधातुमलक्रियः च ...............................
स्वस्थः इति .......................................।

14. प्रादेशिकभाषया विवर्तयत। (4)

© State Assessment Cell – SCERT Kerala

गद्यपद्यमिश्रितं विशिष्टं प्रबन्धकाव्यं भवति चम्पूकाव्यम् । कृष्णयजुर्वेदस्य तैत्तिरीयसंहिता, मैत्रायणीसंहिता, कठसंहिता च चम्पूशैल्याःउत्तमोदाहरणानि सन्ति। चम्पूकाव्ये सामान्यकथनं तु गद्येनैव कथ्यते। किन्तु विशेषकथनाय पद्यमाश्रियन्ते। त्रिविक्रमभट्टस्य नलचम्पू, भोजराजस्य चम्पूरामायणम्, भागवतचम्पू, नैषधचम्पू इत्याद्याः प्रसिद्धाः चम्पूग्रन्थाः भवन्ति ।


15. ब्लसिमहोदयस्य आटुजीवितम् नाम चलच्चित्रं द्रष्टुमुद्युक्तः रहीमः मार्गे स्वसुहृदं विनोदः पश्यति। कस्यचन प्रवासिनः दुरितपूर्णजीवितमाधारीकृत्य बेन्यामिन् महोदयेन विरचिता कथा एव तस्य प्रतिपाद्यम्। मित्रद्वयोर्मिथः प्रवृत्तं संभाषणं संभाव्य लिखत। (4)


**अथवा**

सूचनाः विपुलीकृत्य जीविनचरितं लिखत ।

| | |
|---|---|
| नाम | - सलिम् अलि |
| जन्म | -1896 नवम्बर् 12, मुम्बई |
| पितरौ | - मोय्सुद्दीन् अब्दुल् अलि – सीनत्त् उन्निस |
| प्रशस्तिः | - पक्षिशास्त्रस्य पिता |
| पुरस्काराः | - पद्मभूषण्, पद्मविभूषण् |
| मृत्युः | - 1987 जूण् 20, महाराष्ट्रा |

16. कोष्ठकात् पदानि स्वीकृत्य मातृकानुसारं वाक्यं विपुलीकुरुत। (4)



(ददाति, पुरस्कारं, बालकाय, प्राध्यापकः, साभिमानम्)

**अथवा**

उपसर्गानुसारं मञ्जूषायाः पदानि वर्गीकुरुत।

© State Assessment Cell – SCERT Kerala

| | | |
|---|---|---|
| उपहरति, | अनुभवः, | प्रोत्साहनम्, |
| अतिमोहः, | अनुगच्छति, | उपहासः, |
| अतिशेते, प्रविशति | | |

| | | | |
|---|---|---|---|
| .............. | ................. | ................. | ............ |
| ................ | .................. | ................... | ............. |

17. 'प्रकृतिः सर्वेषाम्' इति विषये लघुविवरणं लिखत। (4)

श्रद्धेयाः अंशाः –

प्रपञ्चः - पञ्चभूतानि – परस्पराश्रयत्वम् – सन्तुलितावस्था – वनीकरणम् – जलस्रोतसंरक्षणम् स्वार्थता।

**अथवा**

'पर्यावरणसंरक्षणम्' इत्यस्मिन् विषये लघुटिप्पणीं लिखत।

श्रद्धेयाः अंशाः –

परिस्थितिः – वायुमलिनीकरणम् - जलमलिनीकरणम् – वनविभावानां चूषणम् – वन्यजीविनां नाशः – सुस्थितेः निदानम्।

© State Assessment Cell – SCERT Kerala